1 ★ RR(B)/300/4479

ಒಟ್ಟು ಮುದ್ರಿತ ಪುಟಗಳ ಸಂಖ್ಯೆ : 12 ]
Total No. of Printed Pages : 12 ]
ಒಟ್ಟು ಪ್ರಶ್ನೆಗಳ ಸಂಖ್ಯೆ : 45 ]
Total No. of Questions : 45 ]
ಸಂಕೇತ ಸಂಖ್ಯೆ: **16-S**
**Code No. : 16-S**

# B

# CCE RR
**UNREVISED**
**REDUCED SYLLABUS**

Question Paper Serial No. **300**

## ವಿಷಯ : ಪ್ರಥಮ ಭಾಷೆ — ಸಂಸ್ಕೃತ
## Subject : First Language — SANSKRIT
## प्रथमभाषा — संस्कृतम्

**(ಪುನರಾವರ್ತಿತ ಶಾಲಾ ಅಭ್ಯರ್ಥಿ / Regular Repeater)**

ದಿನಾಂಕ : 31. 03. 2023 ] [ Date : 31. 03. 2023
ಸಮಯ : ಬೆಳಗ್ಗೆ 10-30 ರಿಂದ ಮಧ್ಯಾಹ್ನ 1-45 ರವರೆಗೆ ] [ Time : 10-30 A.M. to 1-45 P.M.
ಗರಿಷ್ಠ ಅಂಕಗಳು : 100 ] [ Max. Marks : 100

### *ಪರೀಕ್ಷಾರ್ಥಿಗಾಗಿ ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :*

1. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯು ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ 45 ಪ್ರಶ್ನೆಗಳನ್ನು ಹೊಂದಿದೆ.
2. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಹಿಮ್ಮುಖ ಜಾಕೆಟ್ ಮೂಲಕ ಮೊಹರು (ಸೀಲ್) ಮಾಡಲಾಗಿದೆ. ಪರೀಕ್ಷೆ ಪ್ರಾರಂಭವಾಗುವ ಸಮಯಕ್ಕೆ ನಿಮ್ಮ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಬಲಬದಿ ಪಾರ್ಶ್ವವನ್ನು ಕತ್ತರಿಸಿ, ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯಲ್ಲಿ ಎಲ್ಲಾ ಪುಟಗಳು ಇವೆಯೇ ಎಂದು ಪರೀಕ್ಷಿಸಿಕೊಳ್ಳಿ.
3. ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳಿಗೆ ಕೊಟ್ಟಿರುವ ಸೂಚನೆಗಳನ್ನು ಪಾಲಿಸಿ.
4. ಬಲ ಭಾಗದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಅಂಕಿಗಳು ಪ್ರಶ್ನೆಗಳಿಗಿರುವ ಪೂರ್ಣ ಅಂಕಗಳನ್ನು ತೋರಿಸುತ್ತವೆ.
5. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಓದಿಕೊಳ್ಳಲು 15 ನಿಮಿಷಗಳ ಕಾಲಾವಕಾಶವು ಸೇರಿದಂತೆ, ಉತ್ತರಿಸಲು ನಿಗದಿಪಡಿಸಲಾದ ಸಮಯವನ್ನು ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಮೇಲ್ಭಾಗದಲ್ಲಿ ಕೊಡಲಾಗಿದೆ.

### *परीक्षार्थिनां सामान्यसूचनाः*

1. अस्मिन् प्रश्नपत्रे वस्तुनिष्ठाः विषयनिष्ठाश्च पञ्चचत्वारिंशत् (45) प्रश्नाः सन्ति ।
2. इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति । परीक्षासमये प्रश्नपत्रमुद्घाटयितुं दक्षिणपार्श्वेन कर्तयत । प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति वा इति अवलोकयत ।
3. विषयनिष्ठानां वस्तुनिष्ठानाञ्च प्रश्नानां विषये निर्दिष्टाः नियमाः अनुपालनीयाः ।
4. प्रश्नानां प्रति अधिकृताः अङ्काः पार्श्वे लिखिताः सन्ति ।
5. प्रश्नपत्रमुत्तरयितुं निर्धारितः समयावधिः प्रश्नपत्रस्य उपरि भागे लिखितः अस्ति । पञ्चदशनिमेषाः प्रश्नपत्रस्य पठनार्थं निर्धारिताः सन्ति ।

[ Turn over

इतः कर्तयत
**TEAR HERE TO OPEN THE QUESTION PAPER**
**प्रश्नपत्रमुद्घाटयितुमितः कर्तयत**
**Tear here**

**I. अधोलिखितेभ्यः प्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह लिखत ।** **6 × 1 = 6**

1. 'दिवाकरः' अस्य समानार्थकपदम् इदं भवति ।

(A) निशाकरः (B) चकोरः

(C) सूर्यः (D) चन्द्रः

2. 'स्वाधीनः' अस्य विरुद्धार्थकपदम् इदं भवति ।

(A) पराधीनः (B) आधीनः

(C) अन्तर्धानः (D) दैवाधीनः

3. 'राजा' अस्य स्त्रीलिङ्गरूपम् इदं भवति ।

(A) राणी (B) राज्ञी

(C) रजनि (D) रमणी

4. 'भविष्यति' अत्र एषः लकारः भवति ।

(A) लट्लकारः (B) लिट्लकारः

(C) लुट्लकारः (D) लृट्लकारः

5. 'भारते' अत्र एषा विभक्तिः वर्तते ।

(A) प्रथमाविभक्तिः (B) सप्तमीविभक्तिः

(C) चतुर्थीविभक्तिः (D) पञ्चमीविभक्तिः

6. 'भाग्यानि काले फलन्ति' । अत्र रेखाङ्कितपदस्य समुचितं प्रश्नवाचकपदम् इदं भवति ।

(A) कदा (B) कति

(C) कथम् (D) कीदृशी

**II. चतुर्थं पदं लिखत ।** **4 × 1 = 4**

7. इदं जगत् – ईशावास्यम् :: कस्यस्विद्धनम् – .........................।

8. सुरुचिः – उत्तमः :: सुनीतिः – ........................ ।

9. दधीचिः – महर्षिः :: वृत्रासुरः – ........................... ।

10. राजारामः – शरणागतः :: मोघलसेना – ........................... ।

**III. एकवाक्येन उत्तरं लिखत ।** **7 × 1 = 7**

11. कः भूमिं परितः प्रदक्षिणं करोति ?

12. भारतमाता कैः पूजिता ?

13. भोजः कुत्र हन्तव्यः ?

14. इन्द्रः कस्य तपोवनं वव्राज ?

15. के मुहुर्मुहुः परिभवं प्राप्नुवन्ति ?

16. चतुर्विधपुरुषार्थाः के ?

17. कौ अमरत्वं प्राप्तवन्तौ ?

**IV. द्वित्रैः वाक्यैः उत्तरं लिखत ।** **4 × 2 = 8**

18. दधीचेः तपोवनं कथम् आसीत् ?

19. कविः कीदृशीं मातरं नमामि इति वदति ?

20. सन्तुष्टः भगवान् विष्णुः किम् अकरोत् ?

21. प्रजाभिप्रायं स्वीकृत्य चन्नम्मा राजारामं किम् अब्रवीत् ?

**V. सूचनानुसारम् उत्तरं लिखत ।** **4 × 2 = 8**

22. सन्धिं विभज्य नाम लिखत ।

a) ततस्ततः ।

b) भवतीति ।

23. विग्रहवाक्यं विलिख्य समासनाम लिखत ।

a) यथाबलम् ।

b) चक्रपाणिः ।

**अथवा**

समासं कृत्वा समासनाम लिखत ।

a) विषं कण्ठे यस्य सः =

b) दिनं दिनं प्रति =

24. वाक्ये विद्यमानं कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत ।

a) छात्रः अध्येतुं शालां गच्छति ।

b) सेवकः ग्रामं गतवान् ।

[ Turn over

25. वाक्यदोषं परिहरत ।

a) भवन्तः सर्वे अत्र आगच्छत ।

b) शङ्करस्य अभिषेकं रोचते ।

**VI. संस्कृतभाषया अनुवादं कुरुत ।** **1 × 2 = 2**

26. ಮಾನವರು ಪುಣ್ಯದ ಫಲವನ್ನು ಇಚ್ಛಿಸುತ್ತಾರೆ. ಆದರೆ ಪುಣ್ಯವನ್ನು ಇಚ್ಛಿಸುವುದಿಲ್ಲ. ಪಾಪದ ಫಲವನ್ನು ಅಪೇಕ್ಷಿಸುವುದಿಲ್ಲ. ಪ್ರಯತ್ನಪಟ್ಟು ಪಾಪವನ್ನು ಮಾಡುತ್ತಾರೆ.

People expect good return for their deeds. But they do not like to do good deeds. They do not wish to get punished for their bad deeds. But they indulge in bad deeds.

**VII. कर्नाटकभाषया, आङ्ग्लभाषया वा अनुवादं कुरुत ।** **1 × 2 = 2**

27. उद्योग पुरुषलक्षणम् । उद्योगेनैव सर्वं सिध्यति । अतः वयम् उद्योगिनः भवामः ।

**VIII. यथानिर्देशम् उत्तरं त्रिचतुरैः वाक्यैः लिखत ।** **4 × 3 = 12**

28. "लीलावती इति ग्रन्थे बहवः विषयाः निरूपिताः खलु" ।

कः पाठः ? का वदति ? कस्य ग्रन्थः एषः ?

**अथवा**

"याचको भूत्वा अत्र अहम् आगतः" ।

कः पाठः ? कम् अवदत् ? याचकरूपेण कः आगतः ?

29. "शरणागतरक्षणं धर्मः इति अस्माकं श्रद्धा" ।

कः पाठः ? का अवदत् ? शरणागतः कः ?

30. "मया भोजो रक्षितः" ।

कः पाठः ? कः वदति ? कं वदति ?

31. "प्रशास्त्यस्य केसरी नाम वै पिता" ।

कः पाठः ? कः अवदत् ? केसरी कस्य पिता ?

**IX. कवेः देश-काल-कृतीनां विषये त्रिचतुरैः वाक्यैः उत्तरं लिखत ।** **2 × 3 = 6**

32. बल्लाळसेनः ।

33. कालिदासः ।

**X. पद्यपाठस्य नाम उल्लिख्य तात्पर्यं पञ्चषैः वाक्यैः कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत । 3 × 3 = 9**

34. यथा नद्यः स्यन्दमानाः

समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय ।

तथा विद्वान् नामरूपाद्विमुक्तः

परात्परं पुरुषमुपैति दिव्यम् ।।

35. बालार्काभिमुखो बालो

बालार्क इव मूर्तिमान ।

गृहीतुकामो बालार्कं

प्लवतेऽम्बरमध्यगः ।।

36. आत्मशक्तिवर्धिता विशाल दृष्टिसंयुता

द्वेषभाववर्जिता निरन्तरं सुखप्रदा ।

राष्ट्रसत्वधारिणी तमः प्रखण्डखण्डिनी

भारतीयभावना विवृद्धिमेतु भारते ।।

**अथवा**

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।

तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम् ।।

**XI. वाक्ये विद्यमानम् अलङ्कारं सलक्षणं समन्वयत ।** **1 × 3 = 3**

37. सैन्धवमानय ।

**अथवा**

ज्ञानामृतं पीत्वा तुष्टः ।

**XII. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत ।** **1 × 3 = 3**

38. मनीषिणः सन्ति न ते हितैषिणः ।

**XIII. पद्यं पूरयत ।** **1 × 4 = 4**

39. उत्साह ................................................................................

................................................................................।

................................................................................

................................................................................ हेतोः ॥

**XIV. दशवाक्यैः उत्तरं कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत ।**

**3 × 4 = 12**

40. सूर्यचन्द्रयोः विषये अस्माकं पूर्वजानां सिद्धान्तः कः ? विवृणुत ।

[ Turn over

41. हनूमतः जननं बाल्यवृत्तान्तञ्च पद्यानुगुणं लिखत ।

42. अमरनाथगुहाविषये का पुराणकथा अस्ति ?

**अथवा**

तपोधनः दधीचिः त्यागधनः कथं संवृत्तः ? सङ्गृह्य लिखत ।

**XV. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत ।** **1 × 4 = 4**

43. भारतीयेतिहासे सुसमृद्धं वैभवोपेतं च विजयनगर-साम्राज्यम् । तत्र बहवः राजानः स्वयं काव्यज्ञाः कवीनाम् आश्रयदातारः च अभवन् । तेषु सङ्गमवंशीयः राजा बुक्कोऽपि अन्यतमः । एषः कवीनां पोषकः आसीत् । अस्य पुत्रः वीरकम्पणः । स च वीरः योद्धा आसीत् । तस्य भार्या एव गङ्गादेवी । एषा प्रतिभासम्पन्ना शीलवती च आसीत् । सा स्व चातुर्येण सरसोक्त्या पाण्डित्येन च वीरकम्पणस्य प्रीतिपात्रम् अभवत् । अस्याः जन्मस्थानं पित्रोः विषयः वा नोपलभ्यन्ते । तथापि एषा सामान्यपरिवारे सञ्जाता इति केचन विमर्शकाः कथयन्ति ।

**प्रश्नाः**

i) बुक्कस्य पुत्रः कः ?

ii) विजयनगरसाम्राज्यं कीदृशम् आसीत् ?

iii) गङ्गादेवी कथं वीरकम्पणस्य प्रीतिपात्रम् अभवत् ?

iv) बुक्कस्य वंशस्य नाम किम् ?

**XVI. पत्रं लिखत ।** **1 × 5 = 5**

44. धारवाडमण्डलस्य सर्वकारीयप्रौढशालायाः छात्रः/छात्रा इति मत्वा सहोदरस्य जन्मदिनोत्सवनिमित्तं दिनद्वयस्य विरामं सम्प्रार्थ्य कक्ष्याध्यापकं प्रति विरामपत्रं लिखत ।

**अथवा**

प्रवासार्थं धनं प्रेषयितुं पितरं/मातरं प्रति पत्रं लिखत ।

**XVII. दशवाक्यैः प्रबन्धं लिखत ।** **1 × 5 = 5**

45. राष्ट्रियोत्सवः ।

**अथवा**

परिसरसंरक्षणम् ।